**वाश** तिरश्चां शब्दे अक० आह्वाने सक० दि० आत्म० सेट्। ऋदित् चङि न ह्रस्वः। वाश्यते अववाशिष्ट। "उद्वाश्यमानः पितरम्" भट्टिः।

**वाशा** स्त्री वां कामगतं श्यति शो–क। वासके शब्दर०। स्वार्थे क ह्रस्वे अत इत्त्वम्। वाशिका तत्रार्थे शब्दच०।

**वाशित** न० वाश–भावे क्त। १तिरश्चां शब्दे अमरः २आह्वाने च।

**वाशिता** स्त्री वाश–क्त। १करिण्याम् २स्त्रीमात्रे च अमरः

**वा(वा)शिष्ठ** न० वशि(सि)ष्ठस्येदम् अण् तेन प्रोक्तं वा अण्। वशिष्ठप्रणीते १उपपुराणभेदे २योगशास्त्रभेदे च। ३वशि(सि)ष्ठसम्बन्धिनि त्रि०। ४गोमत्यां नद्यां स्त्री हेमच० ङीप्। [मेदि०।

**वाश्र** न० वाश–रक्। १गृहे २चतुष्पथे च। ३दिवसे पु०

**वाष्प(स्प)** पु० वा–प ट्(तु)क् च। १ऊष्मणि २लौहे मेदि० ३चक्षुर्जले च अमरः। संज्ञायां कन्। ४मारिषशाके (नटिया) पुंस्त्री०शब्दर० वा गौ०ङीष्। वाष्पी+(स्पी)-स्वार्थे क। वाष्पि(स्पि)काप्यत्र अमरः।
"मारिषो वाष्पको मार्षः श्वेतो रक्तश्च स स्मृतः। मारिषो मधुरः शीतो विष्टम्भी पित्तहृद् गुरुः। वातश्लेष्मकरो रक्तपित्तहृद् विषमाग्निजित्। रक्तमार्षो गुरुर्नातिसक्षारो मधुरः सरः। श्लेष्मलः कटुकः पाके स्वल्पदोष उदीरितः" भावप्र०। [अववासत् त।

**वास** सुरभीकरणे अद० चु० उभ० सक० सेट्। वासयति ते

**वास** पु० वस–निवासे आच्छादने वा आधारकर्मादौ घञ्। १गृहे २वस्त्रे ३अवस्थाने हेमच०। वास-अच्। ४वासके शब्दर०। तत्रार्थे स्त्रीत्वमपि तत्र टाप्। ५सुगन्धे च। स्थानभेदेऽवस्थाननिषेधो यथा
"तस्मात् सङ्कीर्णवृत्तेषु वासो मम न रोचते। पुंसो ये नाभिनन्दन्ति वृत्तेनाभिजनेन च। न तेषु च वसेत् प्राज्ञः श्रेयोऽर्थी पापबुद्धिषु। ये त्वेवमभिजानन्ति वृत्तेनाभिजनेन च। तेषु साधुषु वस्तव्यं सवासः श्रेयसे मतः" मात्स्ये २८अ०। "धार्मिकैरावृते ग्रामे न व्याधिबहुले भृशम्। न शूद्रराज्ये निवसेन्न पाषण्डजनैर्वृते। हिमवद्विन्ध्ययोर्मध्यं पूर्वपश्चिमयोः शुभम्। मुक्त्वा समुद्रयोर्देशं नान्यत्र निवसेत् द्विजः। अर्द्धक्रोशा नदीकूलं वर्जयित्वा द्विजोत्तमः। नान्यत्र निवसेत् पुण्यं नान्त्यजग्रामसन्निधौ। न संवसेच्च पतितैर्न चण्डालैर्न पुक्कशैः। न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः" कूर्मपु० १५अ०। "धनिनः श्रोत्रियो राजा नदी वैद्यश्च पञ्चमः। पञ्च यत्र न विद्यन्ते तत्र वासं न कारयेत्" चाणक्यः।

**वासक** पु० वास–ण्वुल्। स्वनामख्याते वृक्षे "येन तेन प्रकारेण वासकः कासनाशकः" इति वैद्यकम्
"वासकः कासहृत् स्वर्यः कफपित्तास्रनाशनः। तिक्तः तुवरको हृद्यो लघुः शीतस्तृड्र्तिहृत्। श्वासकासज्वरच्छर्दिमोहकुष्ठक्षयापहः" भावप्र०। २गानाङ्गविशेषे यथा "मनोहरोऽथ कन्दर्पस्तथानन्द एव च। चत्वारो वासकाः प्रोक्ताः शङ्करेण स्वयं पुरा"। केषाञ्चिन्मते नामान्तरम्। "विनोदो वरदश्चैव नन्दः कुमुद एव च। चत्वारो वासकाः प्रोक्ता गीतवाद्यविशारदैः" सङ्गीतदा०।

**वासकसज्जा** स्त्री "कुरुते मण्डनं या तु सज्जिते वासवेश्मनि। सा तु वासकसज्जा स्यात्" इत्युक्तलक्षणे नायिकाभेदे वासकसज्जाप्यत्र सा० द०।

**वासकर्णी** स्त्री वासं देववासं कर्णयत्यत्र कर्ण–आधारे अप् गौरा० ङीष्। यज्ञशालायाम् शब्दर०।

**वासगृह** न० वासयोग्यं गृहम् शाक०। मध्यगृहे अमरः।

**वासत** पुंस्त्री० वास–अतच्। गर्दभे शब्दर०। स्त्रियां ङीष्।

**वासतेयी** स्त्री वसतये हिता ढक्। १रात्रौ त्रि०। २वसतियोग्ये त्रि० "वनेषु वासतेयेषु" भट्टिः। स्त्रियां ङीप्।

**वासन** न० वास–ल्युट्। १सुरभीकरणे २धूपने ३वारिधान्याम् ४वस्त्रे मेदि० ५वासस्थाने शब्दर० ६ज्ञाने च धरणिः वस–णिच्–ल्युट्। ७निक्षेपाधारे निक्षेपार्थे मुद्राङ्किते पात्रे च। "वासनस्थमनाख्याय समुद्रं यन्निधीयते" नारदः। "वासनं निक्षेपाधारभूतं सम्पुटादिकं समुद्रमन्यग्रादियुक्तम्" व्य०त० रघु०। वस–णिच् भावे ल्युट्। ८क्षेपणे च।

**वासना** स्त्री वासि–युच्। १प्रत्याशायां २ज्ञाने मेदि० ३स्मृतिहेतौ संस्कारे जटा०। ४सुरभीकरणे च। मिथ्याज्ञानजन्ये ५संस्कारभेदे देवशब्दार्थे। ६आलयविज्ञानानामेकसन्तानवर्त्तिनां तत्तत्प्रवृत्तिविज्ञानजननशक्तौ बौद्धाः। ७गणितशास्त्रप्रसिद्धे ग्रहस्फुटीकरणाद्युपयोगिनि संस्कारभेदे च।

**वासन्त** पुंस्त्री० वसन्तस्येदम् वसन्ते भवः वा अण्। वसन्तप्रिये १उष्ट्रे मेदि० २कोकिले च राजनि०। स्त्रियां ङीष्। वसन्तभवे ३मलयवायौ ४मुद्गे त्रिका०। ५कृष्णमुद्गे हेमच०। ६मदनवृक्षे च शब्दर०। ७तत्कालभवे त्रि०।